# अवैधाचार: नैव करणीय:।

## अवबोधनम्।

**अ. एकवाक्येन उत्तरत।**

*१. कुमार: **कुत्र** गन्तुम् इच्छति?

उत्तर: कुमार: **राष्ट्रीयपुरस्कारप्राप्तं चित्रपटप्रेक्षणार्थं** गन्तुम् इच्छति।

*२. अवैधाचार: नाम किम्?

उत्तर: अवैधाचार: नाम **केवलं स्वार्थसिद्धये अनुष्ठितं विधिविरुद्धमाचरणं, नियमातिक्रमणं निषिद्धाचरणं च।**

३. जनकेन **किं** श्रुतम्?

उत्तर: **राष्ट्रीयपुरस्कारप्राप्तस्य चित्रपटस्य प्रवेशपत्राणि सद्य: न उपलभ्यन्ते इति** जनकेन श्रुतम्।

४. **केन** अधिकमूल्यं दत्त्वा प्रवेशपत्राणि क्रीतानि?

उत्तर: **कुमारस्य वयस्येन** अधिकमूल्यं दत्त्वा प्रवेशपत्राणि क्रीतानि।

५. कुमारेण कस्य समग्रार्थ: न ज्ञात:?

उत्तर: कुमारेण **अवैधाचार: इति शब्दस्य** समग्रार्थ: न ज्ञात:।

६. **किं** दत्त्वा चित्रपटस्य प्रवेशपत्राणि लभ्यन्ते?

उत्तर: **अधिकमूल्यं** दत्त्वा चित्रपटस्य प्रवेशपत्राणि लभ्यन्ते।

७. कुमारेण **क:** शब्द: श्रुत:?

उत्तर: कुमारेण **अवैधाचार:** शब्द: श्रुत:।

**ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. वयं सर्वे _______ प्रेक्षितुं _______ ।

(चित्रपटं / मूकपटं) (गच्छन्ति / गच्छाम:)

**उत्तर:** वयं सर्वे **चित्रपटं** प्रेक्षितुं **गच्छाम:**।

*२. _______ तथैव करिष्याम:।

(अहम् / वयम् / त्वम् )

**उत्तर:** **वयं** तथैव करिष्याम:।

*३. श्रुत: _______ शब्द: _______ ।

(माम् / मया) (अयम् / अव्ययम्)

**उत्तर:** श्रुत: **मया** शब्द: **अयम्**।

४. चित्रपटस्यास्य _______ सद्य: न _______ ।

(प्रश्नपत्राणि / प्रवेशपत्राणि) (उपलभ्यन्ते / उपलभ्यते)

**उत्तर:** चित्रपटस्यास्य **प्रवेशपत्राणि** सद्य: न **उपलभ्यन्ते**।

५. अधिकमूल्यं _______ प्रवेशपत्राणि _______ ।

(दातुम् / दत्त्वा) (लभ्यन्ते / लब्धुम्)

**उत्तर:** अधिकमूल्यं **दत्त्वा** प्रवेशपत्राणि **लभ्यन्ते**।

६. अपि जानासि _______ यद् असावनुचितः _______?

(त्वम् / वयम्) (मार्गः / गृहम्)

उत्तरः अपि जानासि **त्वं** यद् असावनुचितः **मार्गः**?

**क. कः कं वदति तद् लिखत।**

१. अप्यद्य वयं सर्वे राष्ट्रीयपुरस्कारप्राप्तं चित्रपटं प्रेक्षितुं गच्छामः?

**उत्तरः कुमारः जनकं वदति।**

२. अद्य तु रविवासरः।

**उत्तरः जनकः कुमारं वदति।**

३. जानामि तत्सर्वम्।

**उत्तरः कुमारः जनकं वदति।**

४. सौम्य, कथं त्वया ज्ञायते?

**उत्तरः जनकः कुमारं वदति।**

५. तेनापि तथा क्रीतानि।

**उत्तरः कुमारः जनकं वदति।**

६. तस्य समग्रार्थः न ज्ञातः।

**उत्तरः कुमारः जनकं वदति।**

ङ. **सत्यं वा असत्यं वा तद् लिखत।**

१. कुमारः चित्रपटं प्रेक्षितुम् ऐच्छत्।

**उत्तरः सत्यम्।**

२. चित्रपटस्य प्रवेशपत्राणि सद्यः उपलभ्यन्ते।

**उत्तरः असत्यम्।**

३. कुमारस्य वयस्येन न्यूनं मूल्यं दत्त्वा प्रवेशपत्राणि क्रीतानि।

**उत्तरः असत्यम्।**

४. कुमारः अधिकमूल्यं दत्त्वा प्रवेशपत्राणि क्रेतुम् इच्छति।

**उत्तरः सत्यम्।**

५. कुमारेण 'अवैधाचारः' इति शब्दस्य समग्रार्थः ज्ञातः।

**उत्तरः असत्यम्।**

६. स्वार्थसिद्धये अनुष्ठितं निषिद्धाचरणं नाम अवैधाचारः।

**उत्तरः सत्यम्।**

इ. **योग्यं वा अयोग्यं वा तद् लिखत।**

१. कुमारस्य वयस्येन अधिकमूल्यं दत्त्वा प्रवेशपत्राणि क्रीतानि।

**उत्तरः अयोग्यम्।**

२. कुमारः अधिकमूल्यं दत्त्वा प्रवेशपत्राणि क्रेतुम् इच्छति।

**उत्तरः अयोग्यम्।**

३. जनकः कुमारम् अवैधाचारविषये ज्ञापयति।

**उत्तरः योग्यम्।**

४. स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः कार्यालयेषु अधिकमूल्यं ददति।

**उत्तरः अयोग्यम्।**

**माध्यमभाषया स्वमतप्रकटनम्।**

१. जनैः अवैधाचारः किमर्थं तथा कथम् अवलम्ब्यते? माध्यमभाषया लिखत।

**उत्तरः** 'अवैधाचारः नैव करणीयः।' या पाठात आजच्या जीवनातील भ्रष्टाचाराची समस्या मांडली आहे. भ्रष्टाचाराच्या मदतीने कोणताही प्रश्न सोडवणे सोपे असले, तरीही त्यामुळे त्यात गुंतलेल्या दोन्ही पक्षांचे चारित्र्य कलंकित होते. आपण भ्रष्टाचाराच्या विरोधात ठामपणे उभे राहिले पाहिजे आणि इतरांनाही भ्रष्टाचाराविरुद्ध लढण्यास प्रवृत्त केले पाहिजे.

या पाठात, कुमारने आपल्या वडिलांकडे जास्त किंमत देऊन सिनेमाची तिकिटे विकत घेण्याचा हट्ट धरला, तेव्हा त्याच्या बाबांनी त्याला समजावले, की आपली इच्छा पूर्ण करण्याचा हा अयोग्य मार्ग आहे. हे दुसरेतिसरे काहीही नसून भ्रष्टाचार आहे. आपला स्वार्थ साधण्यासाठी चुकीच्या पद्धतीने वागणे, नियमांचे उल्लंघन करणे, निषिद्ध आचरण करणे म्हणजेच भ्रष्टाचार. भ्रष्टाचार आपल्याला आपल्या सभोवताली अनेक ठिकाणी पाहायला मिळतो. आपले काम त्वरित व्हावे, यासाठी लोक संबंधित कार्यालयात अधिक पैसे देतात. विक्रेते काही वस्तूंची जाणूनबुजून साठेबाजी करतात आणि मग त्या काळ्या बाजारात विकतात. परीक्षा उत्तीर्ण होण्यासाठी देखील ही पैसे चारण्याची पद्धत अवलंबिली जाते. काही मंत्री किंवा राजकारणी लोकांनी देशाची सुरक्षितता व कल्याण यांची किंमत मोजून भ्रष्टाचार केल्याच्या बातम्या आपण वाचतो. भ्रष्टाचार हा खूप मोठा अपराध आहे. हे कायद्याच्या विरुद्ध आहे.

भ्रष्टाचारामुळे भ्रष्ट माणसांचे काम साध्य होते, पण सामान्य माणसे आपल्या हक्कांना मुकतात; म्हणूनच आपण कोणत्याही क्षेत्रातल्या भ्रष्टाचाराला कधीही प्रोत्साहन देऊ नये. काम साध्य करण्यासाठी न्याय्य मार्गाने जाणेच योग्य आहे.

## पृथक्करणम्।

१. वाक्यानि क्रमानुसारं संयोजयत।

i. जनकः प्रवेशपत्रविषये चिन्तां प्रदर्शयति।

ii. जनकः कुमारम् अवैधाचारस्य अर्थं ज्ञापयति।

iii. कुमाराः अधिकमूल्यं दत्त्वा प्रवेशपत्राणि क्रेतुम् उत्सुकः।

iv. कुमारः चित्रपटं प्रेक्षितुम् इच्छति।


उत्तरः i. **कुमारः चित्रपटं प्रेक्षितुम् इच्छति।**

ii. **जनकः प्रवेशपत्रविषये चिन्तां प्रदर्शयति।**

iii. **कुमाराः अधिकमूल्यं दत्त्वा प्रवेशपत्राणि क्रेतुम् उत्सुकः।**

iv. **जनकः कुमारम् अवैधाचारस्य अर्थं ज्ञापयति।**

२. गद्यांशे उपयोजितानि अव्ययानि लिखित्वा जालरेखाचित्रं पूरयत।




उत्तरः १. **अपि।** २. **अद्य।** ३. **किन्तु।**

४. **सद्यः।** ५. **इति।** ६. **तर्हि।**

७. **किन्तु।** ८. **कथम्।** ९. **तथा।**

१०. **केवलम्।** ११. **नाम।**

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायशब्दं चिनुत।**

*१. मित्रम् , सखा, सुहृद् = **वयस्य:।**
*२. त्वरया, शीघ्रम् , झटिति = **सत्वरम्।**
*३. विधि: (कायदा) = **नियम:।**
४. जनक:, जन्मदाता = **तात:।**
५. आत्मज:, तनय:, सुत:, सूनु: = **पुत्र:।** (मुलगा)

**ब. गद्यांशे विलोमशब्दं चिनुत।**

*१. अज्ञात: × **ज्ञात:।**
*२. अपूर्ण: × **समग्र:।**
३. आगच्छाम: × **गच्छाम:।**
४. विक्रीतानि × **क्रीतानि।**
५. उचित: × **अनुचित:।**
६. वैधाचार:(कायदेशीर) × **अवैधाचार:।** (बेकायदेशीर)
७. शनै:, मन्दम् × **सत्वरम्।**

**क. चतुर्थपदं लिखत।**

१. अहम् : जानामि : : त्वम् : ______
**उत्तर:** अहम् : जानामि : : त्वम् : **जानासि**

२. श्रु : श्रुत: : : ज्ञा : ______
**उत्तर:** श्रु : श्रुत: : : ज्ञा : **ज्ञात:**

३. शब्द: : श्रुत: : : वार्ता : ______
**उत्तर:** शब्द: : श्रुत: : : वार्ता : **श्रुता**

४. तद् : तेन : : वयस्य : ______
**उत्तर:** तद् : तेन : : वयस्य : **वयस्येन**

५. तद् : तेषु : : कार्यालय : ______
**उत्तर:** तद् : तेषु : : कार्यालय : **कार्यालयेषु**

६. अप्यद्य : अपि + अद्य : : चित्रपटस्यास्य : ______
**उत्तर:** अप्यद्य : अपि + अद्य : : चित्रपटस्यास्य : **चित्रपटस्य + अस्य**

## ड. विशेषण-विशेष्य-अन्वितिः।

१. दत्तेषु शब्देषु विशेषण-विशेष्य-युगुलानि चित्वा लिखत।

चित्रपटम्, अनुचितः, विधिविरुद्धम्, राष्ट्रीयपुरस्कारप्राप्तम्, मार्गः, आचरणम्

उत्तरः

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| i. | राष्ट्रीयपुरस्कारप्राप्तम् | चित्रपटम् |
| ii. | अनुचितः | मार्गः |
| iii. | विधिविरुद्धम् | आचरणम् |

## इ. धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।

१. गद्यांशे पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्ययं चित्वा लिखत।

उत्तरः त्वान्त-अव्ययम्-

i. दत्त्वा।

२. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

उत्तरः तुमन्त-अव्ययम्-

i. प्रेक्षितुम्।

३. गद्यांशे तृतीया-विभक्त्यन्तपदानि चित्वा लिखत।

उत्तरः i. मया। ii. त्वया।

iii. वयस्येन। iv. तेन।

फ. **समूहेतरपदं चिनुत।**

१. प्रेक्षितुम् , द्रष्टुम्, श्रोतुम्

**उत्तर: श्रोतुम्।**

२. अनुचित:, सूचित:, अयोग्य:

**उत्तर: सूचित:।**

३. अधिकमूल्यम् , नियमातिक्रमणम् , निषिद्धाचरणम्

**उत्तर: अधिकमूल्यम्।**

४. वयम् , वयस्य:, सुहृद्

**उत्तर: वयम्।**

५. मार्ग:, पन्था:, अवैधाचार:

**उत्तर: अवैधाचार:।**

## अवबोधनम्।

अ. **एकवाक्येन उत्तरं लिखत।**

*१. अवैधाचारेण **किं** भवति?

**उत्तर:** अवैधाचारेण **भ्रष्टजनानां कार्यसिद्धि: भवति किन्तु तेन सामान्यजना: स्वाधिकारवञ्चिता: भवन्ति।**

*२. **कस्य** कार्यसिद्धि: नित्यमेव कष्टसाध्या भवति।

**उत्तर: न्याय्यपथानुसारिण: सत्यमार्गगामिन:** कार्यसिद्धि: नित्यमेव कष्टसाध्याभवति।

*३. **के** समाजं परिवर्तयितुं समर्थ:?

**उत्तर: न्याय्यपथगामिन: विरला: जना:** समाजं परिवर्तयितुं समर्थ:।

*४. **केन** विधिभङ्ग: भवति?

**उत्तर: अवैधाचारेण** विधिभङ्ग: भवति।

५. एकोऽपि चन्द्रमा: किं करोति?

**उत्तर:** एकोऽपि चन्द्रमा: **तमो हन्ति विश्वं धवलयति च।**

६. केन दीपमाला प्रज्ज्वाल्यते?

**उत्तर: एकेन दीपेन** दीपमाला प्रज्ज्वाल्यते।

७. अवैधाचारेण **केषां** कार्यसिद्धि: भवति?

**उत्तर:** अवैधाचारेण **भ्रष्टजनानां** कार्यसिद्धि: भवति।

८. कार्यसिद्ध्यर्थं **कः** आचारः उचितः?

**उत्तरः** कार्यसिद्ध्यर्थं **वैधाचारः** आचारः उचितः।

९. चन्द्रमाः **किं** हन्ति?

**उत्तरः** चन्द्रमाः **तमः** हन्ति।

१०. न्याय्यपथगामिनः जनाः **कं** परिवर्तयितुं समर्थः?

**उत्तरः** न्याय्यपथगामिनः जनाः **समाजं** परिवर्तयितुं समर्थः।

**ब. उचितं पर्यायं लिखित्वा रिक्तस्थानं पूरयत।**

१. _______ दीपमाला _______।

(दीपेन / दीपेषु) (शाम्यते / प्रज्ज्वाल्यते)

**उत्तरः** **दीपेन** दीपमाला **प्रज्ज्वाल्यते**।

२. यतः _______ विधिभङ्गः _______।

(तस्मै / तेन) (भवामि / भवति)

**उत्तरः** यतः **तेन** विधिभङ्गः **भवति**।

३. कार्यसिद्ध्यर्थं _______ उचितः।

(वैधाचारः / अवैधाचारः)

**उत्तरः** कार्यसिद्ध्यर्थं **वैधाचारः** उचितः।

४. _______ वैधाचारेण अन्ये जनाः वैधाचारिणः _______।

(एकस्य / कस्य) (भवेताम् / भवेयुः )

**उत्तरः** **एकस्य** वैधाचारेण अन्ये जनाः वैधाचारिणः **भवेयुः**।

**क. कः कं वदति इति लिखत।**

१. महानेष अपराधः।

**उत्तरः जनकः कुमारं वदति।**

२. कस्यापि वस्तुनः निश्चितमूल्यं दत्त्वैव क्रयणमुचितम्।

**उत्तरः कुमारः जनकं वदति।**

३. भवत्सदृशानां केषांचिज्जनामेव मतिरेषा।

**उत्तरः कुमारः जनकं वदति।**

४. एकस्य वैधाचारेण अन्ये जनाः वैधाचारिणः भवेयुः।

**उत्तरः जनकः कुमारं वदति।**

५. अद्यप्रभृति वैधमार्गमेवानुसरामि।

**उत्तरः कुमारः जनकं वदति।**

**ड. सत्यं वा असत्यं वा इति लिखत।**

१. अवैधाचारेण विधिभङ्गः भवति।

**उत्तरः सत्यम्।**

२. कार्यसिद्ध्यर्थम् अवैधाचारः उचितः।

**उत्तरः असत्यम्।**

३. सत्यमार्गगामिनः कार्यसिद्धिः सुलभा भवति।

**उत्तरः असत्यम्।**

४. एकोऽपि सत्यगामी मनुजः समस्तं जनसमूहं प्रेरयति।

**उत्तरः सत्यम्।**

५. एकस्य अवैधाचारेण अन्ये जनाः वैधाचारिणः भवेयुः।

**उत्तरः असत्यम्।**

**इ. योग्यं वा अयोग्यं वा तद् लिखत।**

१. अवैधाचारेण विधिभङ्ग: भवति।

**उत्तर: अयोग्यम्।**

२. अवैधाचारेण भ्रष्टजनानां कार्यसिद्धि: भवति।

**उत्तर: अयोग्यम्।**

३. कार्यसिद्ध्यर्थं वैधाचार: उचित:।

**उत्तर: योग्यम्।**

४. वस्तुन: निश्चितमूल्यं दत्त्वैव क्रयणमुचितम्।

**उत्तर: योग्यम्।**

५. कुमार: वैधमार्गमेव अनुसरितुम् इच्छति।

**उत्तर: योग्यम्।**

**माध्यमभाषया स्वमतप्रकटनम्।**

१. 'एकस्य वैधाचारेण अन्ये जना: वैधाचारिण: भवेयु:' इति विचार: माध्यमभाषया स्पष्टीकुरुत।

**उत्तर:** 'अवैधाचार: नैव करणीय:।' या पाठात आजच्या जीवनातील भ्रष्टाचाराची समस्या मांडली आहे. भ्रष्टाचाराच्या मदतीने कोणताही प्रश्न सोडवणे सोपे असते, मात्र यामुळे त्यात गुंतलेल्या दोन्ही पक्षांचे चारित्र्य कलंकित होते. आपण भ्रष्टाचाराच्या विरोधात ठामपणे उभे राहिले पाहिजे आणि मग आपण इतरांनाही भ्रष्टाचाराविरुद्ध लढण्यासाठी प्रवृत्त करू शकतो.

या पाठात, कुमारला असे वाटते, की 'माणसाने योग्य मार्गाने चालले पाहिजे' अशी विचारसरणी फार कमी लोकांची आहे. आजच्या भ्रष्ट जगात, भ्रष्टाचाराला विरोध करणे फार अवघड झाले आहे. त्यामुळे जो माणूस न्याय्य मार्ग अवलंबतो, त्याला आपले काम साध्य करण्यासाठी अनेक अडचणींचा सामना करावा लागतो. पण कुमारच्या वडिलांनी त्याला पटवून दिले, की सत्याच्या मार्गाने चालणारा एक माणूसही इतर अनेकांना प्रेरित करू शकतो. प्रचंड कष्ट व त्रास सहन केल्यानंतरच चांगल्या गोष्टी घडवता येतात. कष्टाशिवाय कार्यपूर्ती होत नाही. ज्या प्रकारे चंद्र एकटाच संपूर्ण जगातील अंधार नष्ट करतो, त्याचप्रमाणे सत्याचा मार्ग आचरणारा एक माणूस जग बदलू शकतो. एकच दिवा पूर्ण दीपमाळ प्रज्वलित करू शकतो, त्याचप्रमाणे एकच माणूससुद्धा कित्येकांचे प्रबोधन करून त्यांना सत्याचा मार्ग अवलंबण्यासाठी प्रेरित करू शकतो. एका व्यक्तीच्या कायदा पाळण्यामुळे इतर लोकही कायदा पाळू लागतात.

म्हणूनच, प्रत्येकाने भ्रष्टाचाराच्या विरोधात ठामपणे उभे राहिले पाहिजे. एक व्यक्ती पूर्ण समुदायाला प्रेरणा देऊ शकते. हळूहळू थोडी माणसे एकत्र येऊन समाजात नक्कीच बदल घडवून आणू शकतात.


## पृथक्करणम्।

१. घटनाक्रमानुसारं संयोजयत।

i. कुमारेण न्याय्यमार्गानुसरणविषये शङ्काप्रदर्शनम्।
ii. कुमारेण वैधाचारं प्रतिश्रुतम्।
iii. वैधाचारस्य सामर्थ्यकथनम्।
iv. जनकेन अवैधाचारस्य परिणामकथनम्।

उत्तर: **i. जनकेन अवैधाचारस्य परिणामकथनम्।**
**ii. कुमारेण न्याय्यमार्गानुसरणविषये शङ्काप्रदर्शनम्।**
**iii. वैधाचारस्य सामर्थ्यकथनम्।**
**iv. कुमारेण वैधाचारं प्रतिश्रुतम्।**

२.    गद्यांशे आगतानि अव्ययानि चित्वा जालरेखाचित्रं पूरयत।




| | | | | | | |
|---|---|---|---|---|---|---|
| उत्तर: | १. | अथ। | २. | किम्। | ३. | यत:। |
| | ४. | किन्तु। | ५. | अत:। | ६. | अपि। |
| | ७. | तु। | ८. | नित्यम्। | ९. | एव। |
| | १०. | एवम्। | ११. | यथा। | १२. | तथा। |

## शब्दज्ञानम्।

अ.    **गद्यांशे पर्यायशब्दं चिनुत।**

| | | | |
|---|---|---|---|
| *१. | अन्धकार: | = | **तम:।** |
| २. | नियमभङ्ग:, न्यायभङ्ग: | = | **विधिभङ्ग:।** |
| ३. | बुद्धि:, धी:, प्रज्ञा | = | **मति:।** |
| ४. | सदैव, निरन्तरम् | = | **नित्यम्।** |
| ५. | वीर:, प्रगल्भ:, शूर: | = | **धीर:।** |
| ६. | चन्द्र:, शशी, हिमांशु:, इन्दु: | = | **चन्द्रमा:।** |
| ७. | मनुष्य:, नर:, मानव: | = | **मनुज:।** |
| ८. | क्षम:, अर्ह: | = | **समर्थ:।** |

**ब.** **गद्यांशे विलोमपदानि चिनुत।**

| | | | |
|---|---|---|---|
| *१. | सुसाध्या, सहजसाध्या | × | **कष्टसाध्या।** |
| *२. | बहुला:, प्रभूता: | × | **विरला:।** |
| ३. | वैधाचार: | × | **अवैधाचार:।** |
| ४. | विक्रयणम् | × | **क्रयणम्।** |
| ५. | गृहीत्वा | × | **दत्त्वा।** |
| ६. | कातर:, भीत:, भीरु:, कापुरुष: (भित्रा) | × | **धीर:।** (धाडसी) |
| ७. | प्रकाश:, भा, दीप्ति: (उजेड) | × | **तम:।** (अंधार) |
| ८. | असमर्था:, अक्षमा: | × | **समर्था:।** |

**क.** **चतुर्थपदं लिखत।**

१. अवैधाचार: : अनुचित: :: वैधाचार: : ______

**उत्तर:** अवैधाचार: : अनुचित: :: वैधाचार: : **उचित:**

२. न्याय्यपथानुसारिन् : न्याय्यपथानुसारिण: :: सत्यमार्गगामिन् : ______

**उत्तर:** न्याय्यपथानुसारिन् : न्याय्यपथानुसारिण: :: सत्यमार्गगामिन् : **सत्यमार्गगामिन:**

३. जनसमूहं प्रेरयति : सत्यगामी मनुजः :: तमो हन्ति : ________

**उत्तर:** जनसमूहं प्रेरयति : सत्यगामी मनुजः :: तमो हन्ति : **चन्द्रमाः**

## ड. विशेषण-विशेष्य-अन्विति:।

१. विशेषण-विशेष्ययुगुलानि चित्वा स्तम्भमेलनं कुरुत।

| | विशेषणम् | | विशेष्यम् |
|---|---|---|---|
| i. | सत्यगामी | अ. | वैधाचार: |
| ii. | उचित: | ब. | जनसमूहम् |
| iii. | न्याय्यपथगामिन: | क. | मनुज: |
| iv. | समस्तम् | ड. | जना: |

**उत्तर:** **i. सत्यगामी मनुजः।**
**ii. उचितः वैधाचारः।**
**iii. न्याय्यपथगामिनः जनाः।**
**iv. समस्तं जनसमूहम्।**

२. स्तम्भमेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | महान् | अ. | क्रयणम् |
| ii. | स्वाधिकारवञ्चिता: | ब. | अपराध: |
| iii. | उचितम् | क. | कार्यसिद्धि: |
| iv. | कष्टसाध्या | ड. | जनसामान्या: |

**उत्तर:** **i. महान् अपराधः।**
**ii. स्वाधिकारवञ्चिताः जनसामान्याः।**
**iii. उचितं क्रयणम्।**
**iv. कष्टसाध्या कार्यसिद्धिः।**

३. गद्यांशे चतुर्थपदं चित्वा लिखत।

एकः : चन्द्रमाः :: सत्यगामी : ________

**उत्तर:** एकः : चन्द्रमाः :: सत्यगामी : **मनुजः**

४. गद्यांशे 'वैधाचारिण: जना:' इत्यस्य कृते योग्यानि विशेषणानि चित्वा जालरेखाचित्रं पूरयत।




उत्तर: १. न्याय्यपथगामिन:।

२. विरला:।

३. समर्था:।

४. सन्मार्गगामिन:।

**इ. धातुसाधित-अव्ययानां चयनम् (त्वान्त / ल्यबन्त / तुमन्त) / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्ययं चित्वा लिखत।

**उत्तर: त्वान्त-अव्ययम्-**

**i. दत्त्वा।**

२. गद्यांशे हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

**उत्तर: तुमन्त-अव्ययम्-**

**i. परिवर्तयितुम्।**

३. गद्यांशे तृतीया-विभक्त्यन्तपदानि चित्वा लिखत।

**उत्तर: i. तेन।**

**ii. वैधाचारै:।**

**iii. दीपेन।**

**iv. एकेन।**

**v. वैधाचारेण।**

## फ. समूहेतरपदं चित्वा लिखत।

१. विधिभङ्ग:, वैधाचार:, न्यायभङ्ग:

उत्तर: **वैधाचार:।**

२. कार्यसिद्धि:, अवैधाचार:, भ्रष्टाचार:

उत्तर: **कार्यसिद्धि:।**

३. कष्टसाध्या, मति:, बुद्धि:

उत्तर: **कष्टसाध्या।**

४. न्याय्यपथगामिन:, सत्यमार्गगामिन:, भ्रष्टजना:

उत्तर: **भ्रष्टजना:।**

५. चन्द्रमा:, शशी, भास्कर:

उत्तर: **भास्कर:।**

६. विश्वम् , अखिलम् , जगत्

उत्तर: **अखिलम्।**

७. मनुज:, नर:, जनसामान्या:

उत्तर: **जनसामान्या:।**

## कृतिपत्रिकाया: तृतीय: विभाग: - व्याकरणम्।

### सन्धय:।

| | | | |
|---|---|---|---|
| *१. | चित्रपटस्यास्य | = | **चित्रपटस्य + अस्य।** |
| *२. | शब्दोऽयम् | = | **शब्द: + अयम्।** |
| *३. | किमेष: | = | **किम् + एष:।** |
| *४. | मतिरेषा | = | **मति: + एषा।** |
| *५. | दीपेनैकेन | = | **दीपेन + एकेन।** |
| ६. | अप्यद्य | = | **अपि + अद्य।** |
| ७. | नोपलभ्यन्ते | = | **न + उपलभ्यन्ते।** |
| ८. | असावनुचित: | = | **असौ + अनुचित:।** |
| ९. | कार्यालयेष्वधिकमूल्यम् | = | **कार्यालयेषु + अधिकमूल्यम्।** |

| | | | |
|---|---|---|---|
| १०. | महानेष: | = | **महान् + एष:।** |
| ११. | दत्त्वैव | = | **दत्त्वा + एव।** |
| १२. | क्रयणमुचितम् | = | **क्रयणम् + उचितम्।** |
| १३. | केषांचिज्जनानामेव | = | **केषांचित् + जनानाम् + एव।** |
| १४. | एकोऽपि | = | **एक: + अपि।** |
| १५. | वैधमार्गमेवानुसरामि | = | **वैधमार्गम् + एव + अनुसरामि।** |

**पदपरिचयः।**

## धातवः।

### वर्तमानकालः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१. | जानामि | ज्ञा | ९ उ.प. येथे प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| *२. | ददति | दा | ३ उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | बहुवचनम् |
| ३. | गच्छामः | गम् – गच्छ् | १ प.प. | वर्तमानकालः | प्रथमः | बहुवचनम् |
| ४. | जानासि | ज्ञा | ९ उ.प. येथे प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |
| ५. | भवन्ति | भू – भव् | १ प.प. | वर्तमानकालः | तृतीयः | बहुवचनम् |
| ६. | हन्ति | हन् | २ प.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| ७. | अनुसरामि | अनु + सृ – सर् | १ प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |

### आज्ञार्थः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| ८. | श्रुणु | श्रु → शृ | ५ प.प. | आज्ञार्थः | द्वितीयः | एकवचनम् |
| ९. | पश्य | दृश् → पश्य् | १ प.प. | आज्ञार्थः | द्वितीयः | एकवचनम् |

### विध्यर्थः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| १०. | भवेयुः | भू – भव् | १ प.प. | विध्यर्थः | तृतीयः | बहुवचनम् |

### कर्मणि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *११. | ज्ञायते | ज्ञा | ९ उ.प. | कर्मणि, वर्तमानकालः | तृतीयः | एकवचनम् |
| *१२. | उपलभ्यन्ते | उप + लभ् | १ आ.प. | कर्मणि, वर्तमानकालः | तृतीयः | बहुवचनम् |
| १३. | लभ्यन्ते | लभ् | १ आ.प. | कर्मणि, वर्तमानकालः | तृतीयः | बहुवचनम् |

## प्रयोजकम्।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | प्रयोजकम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|---|
| १४. | प्रज्ज्वाल्यते | प्र + ज्वल् | १ प.प. | प्रयोजकम् | कर्मणि, वर्तमानकालः | तृतीयः | एकवचनम् |
| १५. | प्रेरयति | प्र + ईर् | २ आ.प. | प्रयोजकम् | वर्तमानकालः | तृतीयः | एकवचनम् |

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | प्रयोजकम् | हेत्वर्थक-धातुसाधितम् |
|---|---|---|---|---|---|
| १६. | परिवर्तयितुम् | परि + वृत् → वर्त् | १ आ.प. | प्रयोजकम् | तुमन्त-अव्ययम् |

## स्य / द्वितीय-भविष्यत्कालः।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१७. | करिष्यामः | कृ | ८ उ.प. येथे प.प. | भविष्यत्कालः | प्रथमः | बहुवचनम् |

## पूर्वकालवाचक – धातुसाधित – अव्ययम्।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | पूर्वकालवाचकम् |
|---|---|---|---|---|
| *१८. | दत्त्वा | दा → यच्छ् | १ प.प. | त्वान्त-अव्ययम्। |

## हेत्वर्थक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | हेत्वर्थक - धातुसाधितम् |
|---|---|---|---|---|
| *१९. | प्रेक्षितुम् | प्र + ईक्ष् | १ आ.प. | तुमन्त-अव्ययम्। |

## नामधातुः।

| क्र. | रूपम् | प्रातिपदिकम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| *२०. | धवलयति | धवल | वर्तमानकालः | तृतीयः | एकवचनम् |

## कर्मणि – विध्यर्थक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | विध्यर्थकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| २१. | वक्तव्यम् | वच् | २ प.प. | कर्मणि-वि-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | ब्रू | २ उ.प. | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |

**कर्मणि – भूतकालवाचक – धातुसाधित – विशेषणानि।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचक | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *२२. | क्रीतानि | क्री | ९ प.प. | कर्मणि-भू-धा-वि. | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |
| २३. | श्रुतम् | श्रु → शृ | ५ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| २४. | कथितम् | कथ् | १० उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |
| २५. | श्रुतः | श्रु → शृ | ५ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| २६. | ज्ञातः | ज्ञा | ९ उ.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| २७. | अनुष्ठितम् | अनु + स्था – तिष्ठ् | १ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | द्वितीया | एकवचनम् |
| | | | | | नपुंसकलिङ्गम् | प्रथमा, द्वितीया | एकवचनम् |

## नामानि।

| क्र. | रूपम् | प्रातिपदिकम् | प्रकारः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *२८. | वस्तुनः | वस्तु | उकारान्तम् | नपुंसकलिङ्गम् | पञ्चमी, षष्ठी | एकवचनम् |
| २९. | वयस्येन | वयस्य | अकारान्तम् | पुंलिङ्गम् | तृतीया | एकवचनम् |
| ३०. | मतिः | मति | इकारान्तम् | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| ३१. | धीराणाम् | धीर | अकारान्तम् | पुंलिङ्गम् | षष्ठी | बहुवचनम् |
| ३२. | चन्द्रमाः | चन्द्रमस् | सकारान्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ३३. | सत्यगामी | सत्यगामिन् | इन्नन्तम् | पुंलिङ्गम् | प्रथमा | एकवचनम् |

## सर्वनामानि।

| क्र. | रूपम् | प्रातिपदिकम् | पुरुषवाचकः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *३४. | वयम् | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | प्रथमा | बहुवचनम् |
| ३५. | सर्वे | सर्व | तृतीयपुरुषः | पुंलिङ्गम् | प्रथमा | बहुवचनम् |
| | | | | नपुंसकलिङ्गम् , स्त्रीलिङ्गम् | प्रथमा,द्वितीया | द्विवचनम् |
| ३६. | अस्य | इदम् | तृतीयपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | षष्ठी | एकवचनम् |
| ३७. | मया | अस्मद् | प्रथमपुरुषः | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |
| ३८. | त्वया | युष्मद् | द्वितीयपुरुषः | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |
| ३९. | असौ | अदस् | तृतीयपुरुषः | पुंलिङ्गम् , स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| ४०. | एषः | एतद् | तृतीयपुरुषः | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४१. | अयम् | इदम् | तृतीयपुरुषः | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| ४२. | तेषु | तद् | प्रथमपुरुषः | पुंलिङ्गम् , नपुंसकलिङ्गम् | सप्तमी | बहुवचनम् |

## समासपरिचयः।

### विभक्ति – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१. | स्वार्थसिद्धये | i. स्वस्य अर्थः। स्वार्थः।<br>(स्वतःच्या फायद्यासाठी)<br>ii. स्वार्थस्य सिद्धिः।<br>(स्वार्थाची सिद्धी) | –<br><br>तस्यै। | षष्ठी-तत्पुरुषः।<br><br>षष्ठी-तत्पुरुषः। |
| *२. | नियमातिक्रमणम् | नियमानाम् अतिक्रमणम्<br>(नियमांचे अतिक्रमण) | – | षष्ठी-तत्पुरुषः। |
| *३. | कार्यसिद्ध्यर्थम् | i. कार्यस्य सिद्धिः। कार्यसिद्धिः।<br>(कार्याची सिद्धी)<br>ii. कार्यसिद्ध्यै इदम्।<br>(कार्यसिद्धीसाठी) | –<br>– | षष्ठी-तत्पुरुषः।<br><br>चतुर्थी-तत्पुरुषः। |
| *४. | स्वकार्यस्य | स्वस्य कार्यम्।<br>(स्वतःचे कार्य) | तस्य। | षष्ठी-तत्पुरुषः। |
| ५. | भवत्सदृशानाम् | भवद्भिः सदृशाः।<br>(तुमच्यासारखा) | तेषाम्। | तृतीया-तत्पुरुषः। |
| ६. | कष्टसाध्या | कष्टैः साध्या।<br>(कष्टाने साध्य) | – | तृतीया-तत्पुरुषः। |
| ५. | विधिविरुद्धम् | विधेः विरुद्धम्।<br>(कायद्याच्या विरुद्ध) | – | षष्ठी-तत्पुरुषः। |

| | | | | |
|---|---|---|---|---|
| ८. | विधिभङ्ग: | विधे: भङ्ग।<br>(कायद्याचा भंग) | – | षष्ठी-तत्पुरुष:। |
| ९. | स्वाधिकारवञ्चिता: | i. स्वस्य अधिकारा:। स्वाधिकारा:।<br>(स्वत:चे अधिकार)<br>ii. स्वाधिकारात् वञ्चिता:।<br>(स्वाधिकारांपासून वंचित) | –<br><br>– | षष्ठी-तत्पुरुष:।<br><br>पञ्चमी-तत्पुरुष:। |
| १०. | जनसमूहम् | जनानां समूह:।<br>(लोकांचा समूह) | तम्। | षष्ठी-तत्पुरुष:। |
| ११. | दीपमाला | दीपानां माला।<br>(दीव्यांची माळ) | – | षष्ठी-तत्पुरुष:। |

**उपपद – तत्पुरुष:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| *१२. | सत्यमार्गगामिन: | सत्यमार्गं गच्छन्ति इति।<br>(सत्याच्या मार्गाने जाणारा) | – | उपपद- तत्पुरुष:। |

**कर्मधारय:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| *१३. | समग्रार्थ:। | समग्र: अर्थ:।<br>(संपूर्ण अर्थ) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| *१४. | अधिकमूल्यम् | अधिकं मूल्यम्।<br>(अधिक मूल्य) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| *१५. | निषिद्धाचरणम् | निषिद्धम् आचरणम्।<br>(निषिद्ध आचरण) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| *१६. | न्याय्यपथानुसारिण: | i. न्याय्य: पन्था:। न्याय्यपन्था:।<br>(न्याय्य मार्ग)<br>ii. न्याय्यपन्थानम् अनुसरन्ति इति।<br>(न्याय्य मार्गाने चालणारा) | –<br><br>– | विशेषण-पूर्वपद-कर्मधारय:।<br><br>उपपद-तत्पुरुष:। |
| १७. | भ्रष्टजनानाम् | भ्रष्टा: जना:।<br>(भ्रष्ट जन) | तेषाम्। | विशेषण-पूर्वपद-कर्मधारय:। |
| १८. | निश्चितमूल्यम् | निश्चितं मूल्यम्।<br>(ठरविलेले मूल्य) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| १९. | वैधाचारेण | वैध: आचार:।<br>(कायदेशीर वर्तन) | तेन। | विशेषण-पूर्वपद-कर्मधारय:। |
| २०. | वैधमार्गम् | वैध: मार्ग:।<br>(कायदेशीरमार्ग) | तम्। | विशेषण-पूर्वपद-कर्मधारय:। |

**नञ्- तत्पुरुषः।**

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| २१. | अवैधाचारः। | i. न वैधः। अवैधः।<br>(कायदेशीर नसलेला)<br>ii. अवैधः आचारः।<br>(बेकायदेशीर वर्तन) | –<br>– | नञ्- तत्पुरुषः।<br>विशेषण-पूर्वपद-कर्मधारयः। |
| २२. | अनुचितः। | न उचितः।<br>(उचित नसलेला) | – | नञ्- तत्पुरुषः। |